अच्छभल्लः, पुं, (अच्छा निर्म्मलाः भल्लाः शस्त्राणीव नखा यस्य सः बहुव्रीहिः यथा—मेदिन्यां भल्लः स्यात् पुंसि भल्लूके शस्त्रभेदे पुनर्द्वयोः) भालूकः। इत्यमरः। तट्टीकाकारमते अच्छो भल्लश्चेति शब्दद्वयमपि ॥

अच्छा, स्त्री, (अः विष्णुश्छायते आच्छाद्यतेऽनया, छो + करणे अङ्। अस्य विष्णोः छा आच्छादनं षष्ठी-तत्पुरुषः। अकारो वासुदेवः स्यादित्येकाक्षरीय-कोषे।) विष्णोराच्छादन। इति मुग्धबोधव्याकरणं॥

अच्छिद्रं, त्रि, (नास्ति छिद्रं यत्र बहुव्रीहिः) छिद्र-रहितं। दोषाभावविशिष्टं। यथा शातातप-पराशरौ।—

"अच्छिद्रमिति यद्वाक्यं वदन्ति क्षितिदेवताः।
प्रणम्य शिरसा ग्राह्यमग्निष्टोमफलैः समं"॥

इति श्राद्धतत्त्वं॥

अच्छिद्रावधारणं, क्ली, (अच्छिद्रस्य दोषरहित-कर्म्मणः अवधारणं निश्चयः) दोषरहितकर्म्म-निश्चयः। तज्ज्ञापकवाक्यं। यथा,—
ततः कर्म्ममात्रप्राप्ताच्छिद्रावधारणं कुर्य्यात्। तथाच शातातपपराशरौ।—

"अच्छिद्रमिति यद्वाक्यं वदन्ति क्षितिदेवताः।
प्रणम्य शिरसा ग्राह्यमग्निष्टोमफलैः समं"॥

इति श्राद्धतत्त्वं॥
अपि च। वशिष्ठः।
"ततः शान्तिं प्रकुर्व्वीत अवधारणवाचनं"।
अवधारणं अच्छिद्रावधारणं। इति तिथ्यादि-तत्त्वं॥ तद्वाक्यं यथा,—अद्यामुके मासि अमुक-पक्षे अमुकतिथौ मत्कृतैतदमुककर्म्माच्छिद्रमस्तु॥

अच्छिन्नं, त्रि, (छिद + कर्म्मणि क्तः न छिन्नं नञ्-समासः) छेदरहितं। अकर्त्तितं। यथा गर्गः,—

"श्रुत्वा पुत्त्रस्य वै जन्म कृत्वा वेदोदिताः क्रियाः।
अच्छिन्ननालं पश्येत्तं दत्त्वा रुक्मं फलान्वितं"॥

इति शुद्धितत्त्वं॥
अपि च। शङ्खः।

"अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः।
हेतुनिष्ठश्च पञ्चैते न तीर्थफलभागिनः"॥

अच्छिन्नसंशयः फलोपायेतिकर्त्तव्यतासु निश्चय-शून्यः। इति प्रायश्चित्ततत्त्वं॥

अच्युतः, पुं, (न च्यवते स्वरूपतो न गच्छति यः नित्य इति यावत्। च्यु + कर्त्तरि क्तः न च्युतः नञ्-समासः। पीताम्बरोऽच्युतः शार्ङ्गीत्यमरः) विष्णुः। इत्यमरः॥ (यथा कुमारसम्भवे,—तत्रावतीर्य्या-च्युतदत्तहस्तः।) स्थिरे त्रि॥ सोऽन्त्यवेलायामेत-त्त्रयं प्रतिपद्येताक्षितमस्यच्युतमसि प्राणसंशित-मसीति छान्दोग्योपनिषत्।

अच्युताग्रजः, पुं, (अच्युतस्य अग्रजः) बलरामः। इत्य-मरः॥ इन्द्रः। इति हेमचन्द्रः॥

अच्युतावासः, पुं, (आउष्यते वासः क्रियतेऽत्र आ + वस् + अधिकरणे घञ् यद्वा अच्युतस्य आवासः। 'अश्वत्थः सर्व्ववृक्षाणां देवर्षीणाञ्च नारदः' इति भगवद्गीतायाम्।) अश्वत्थवृक्षः।
इति राजनिर्घण्टः॥

अज क्षेपे। गतौ। इति कविकल्पद्रुमः॥ अजति। इति दुर्गादासः॥

अज इक भासि (अजि दीप्तौ चुरा इदित्वान्नुम्।) इति कविकल्पद्रुमः॥ इक अञ्जयति। भासि दीप्तौ। इति दुर्गादासः॥

अजः, पुं, (न जायते नोत्पद्यते यः नञ् + जन् + अन्ये-ष्वपि दृश्यत इति कर्त्तरि डः उपपदसमासः।)
("न हि जातो न जायेऽहं न जनिष्ये कदाचन।
क्षेत्रज्ञः सर्व्वभूतानां तस्मादहमजः स्मृतः"॥
इति भारते।
"यो मामजमनादिञ्च वेत्ति लोकमहेश्वरम्"।
इति भगवद्गीतायाम्।) ब्रह्मा। विष्णुः। शिवः। कामदेवः। सूर्य्यवंशीयराजविशेषः। स च रघु-राजपुत्त्रः दशरथपिता च। मेषः। इति ज्यो-तिषं॥ माक्षिकधातुः। इति हेमचन्द्रः॥ जन्म-रहिते वाच्यलिङ्गः। छागः। इति मेदिनी॥ तत्-परीक्षा। यथा,—

"नक्षत्राणां विभेदेन नराणान्तु गणत्रयं।
तेषां शुभाय निर्द्दिष्टं पशुवस्तत्रयं बलौ॥
ये कृष्णाः शुचयश्छागाः पशवोऽन्ये तथैव च।
देवजातिभिरुत्सृज्यास्ते सर्व्वार्थोपसिद्धये॥
ये पीता हरिता वापि नरजातेरुदीरिताः।
ये शुक्लाश्च महान्तो वा रक्षोजातेः शुभप्रदाः॥
यो मोहादथवाज्ञानाद्बलिमन्यं प्रयच्छति।
बध एव फलं तस्य नान्यत् किञ्चित् फलं भवेत्"॥

इति युक्तिकल्पतरुः॥

अजकर्णः, पुं, (अजस्य छागस्य कर्णवत् पत्त्रं यस्य सः) असनवृक्षः। इति रत्नमाला॥ यथा वैद्यके।
("अजकर्णः कटुस्तिक्तः कषायोष्णो व्यपोहति।
कफपाण्डुश्रुतिगदान् मेहकुष्ठविषव्रणान्"॥)

अजकर्णकः, पुं, (अजकर्णः + स्वार्थे कः) सालवृक्षः। इति राजनिर्घण्टः॥

अजकवः, पुं, क्ली, (अजो विष्णुश्च कः ब्रह्मा च द्वन्द्वः तौ वाति शिवः त्रिपुरासुरबधे प्रीणयत्यनेन अज क + वा + करणे कः। "कः प्रजापतिरुद्दिष्टः को वायुरिति शब्दित" इत्येकाक्षरीयकोषे) शिव-धनुः। इति त्रिकाण्डशेषः॥

अजकावः, पुं, क्ली, शिवधनुः। इति त्रिकाण्डशेषः॥

अजगन्धा, स्त्री, (अजस्य गन्धवत् गन्धो यस्याः सा) वनयवानी। तत्पर्य्यायः। अजमोदा २। खराश्वा ३ कारवी ४। इति रत्नमाला॥ उग्रगन्धा ५। इत्य-मरः॥ वृक्षविशेषः। ववरी इति हिन्दीभाषा॥ इति मदनविनोदः॥ तिलोणि इति राजनिर्घण्टः॥ तत्पर्य्यायः। वस्तगन्धा ३ खरपुष्पा ४ अवि-गन्धिका ५ उग्रगन्धा ६ ब्रह्मगर्भा ७ ब्राह्मी ८ पूति-मयूरिका ९। अस्या गुणाः। कटुत्वं। उष्णत्वं। वातगुल्मोदररोगकर्णव्रणार्त्तिशूलनाशित्वं। पीता चेदङ्गने हिता। इति राजनिर्घण्टः॥

अजगन्धिका, स्त्री, (अजस्य गन्धः षष्ठीतत्पुरुषः तद्वत् गन्धोऽस्यास्ति अजगन्ध + मत्वर्थे ठन् ठस्येक इति ठस्य इकः) वर्व्वरीवृक्षः। इत्यमरः॥ वावरि इति भाषा।

अजगन्धिनी, स्त्री, (अजगन्धोऽस्यास्ति अजगन्ध + मत्वर्थे इन् स्त्रियां ङीप्) अजशृङ्गीवृक्षः। इति रत्नमाला॥

अजगरः, पुं, (अजं गिरति ग्रसते यः गृ + पचाद्यच् अजस्य गरः षष्ठी तत्पुरुषः) स्वनामख्यातवृहत्-सर्पः। तत्पर्य्यायः। शयुः २ वाहसः ३। इत्यमरः॥

अजगवं, क्ली, (अजयोर्विष्णुब्रह्मणोर्गं त्रिपुरासुरबधे गीतं षष्ठी तत्पुरुषः। तादृशं गीतं वाति सम्ब-ध्नाति यत् अजग + वा + कर्त्तरि क उपपद-समासः। "गश्च गीतश्च गौश्चैव गुरुश्च धेनुः सरस्वती" इत्येकाक्षरीयकोषे) पिनाकः। शिवधनुः। इत्य-मरः॥ तस्य रूपान्तरं। अजकवं। अजकावं। अजीकवं। अजगावं॥

अजगावं, क्ली, (अजयोर्व्विष्णुब्रह्मणोर्गं गीतं षष्ठी तत्पुरुषः। तादृशं गीतमवति सम्पादयति यत् अजग + अव + कर्म्मण्यण् उपपदसमासः) शिव-धनुः। इति शब्दमाला॥

अजजीविकः, पुं, (अजः जीविका जीवनोपायो यस्य सः) अजाजीवी। छागपालकः। तत्पर्य्यायः। जावालः २। इति हेमचन्द्रः॥

अजटा, स्त्री, (नास्ति जटा यस्याः सा) भूम्यामलकी इति राजनिर्घण्टः॥ तस्या रूपान्तरं। अजड़ा। अज्झटा॥

अजड़ा, स्त्री, (अजड़ां जाड्याभावं सम्पादयति या अज-ड़ा + करोत्यर्थे णिच् ततः पचाद्यच्) कपिकच्छुः। आलकुशी इति भाषा॥ इति राजनिर्घण्टः॥

अजथ्या, स्त्री, (अजानां समूहः अज + थ्यन् स्त्रियां टाप् अजसमूहः। तद्वन्नानावर्णत्वात्) स्वर्ण-यूथिका। इति दीपिका॥

अजदण्डी, स्त्री, (अजस्य ब्रह्मणो यज्ञाय दण्डः काष्ठ-मस्याः सा स्त्रियां ङीप्। ब्रह्मदण्डीवृक्षकाष्ठेन यज्ञ-विधानात्) ब्रह्मदण्डीवृक्षः इति राजनिर्घण्टः॥

अजनकः, त्रि, (न जनकः नोत्पादकः नञ्समासः। जन-यति जन् + णिच् ण्वुल्) अनुत्पादकः। अजन्मदः। अस्रष्टा। अकारकः॥

अजननिः, पुं, (न + जन् + आक्रोशे नञ्यनिरिति सूत्रेण निन्दायां भावे अनिः। तस्याजननिरेवास्तु जननीक्लेशकारिण इति प्रसिद्धप्रयोगोऽप्यस्ति) जन्मराहित्यं। उत्पत्त्यभावः। अकरणिः। शापः। यथा। अजननिरस्तु तस्य। इत्यमरटीकायां रायमुकुटः॥

अजन्यं, क्ली, (न जन्यते सम्पाद्यते केनापि न + जन् णिच् यत्) उत्पातः। शुभाशुभसूचकभूकम्पादिः। इत्यमरः॥ अजननीये त्रि॥

अजपः, पुं, (अप्रशस्तं जपति पठति यः। जप् + पचा-द्यच् न जपः नञ्समासः।) असदध्येता। कुपाठकः। इति हेमचन्द्रः॥ (अजं पाति रक्षति यः + अज + पा + कर्त्तरि क उपपदसमासः) छागपालकः। यथा,—
"औषधीर्नामरूपाभ्यां जानते ह्यजपा वने"।
इति चरकः॥

अजपा, स्त्री, (न जप्यते नोच्चार्य्यतेऽसौ अपितु श्वास-